# महोपाध्याय श्रीमेघविजयगणिरचितः सेवालेखः ।

सं. विजयशीलचन्द्रसूरि

महोपाध्याय श्रीमेघविजयजी ए १८मा शतकमां थयेल जैन साधु-विद्वानोना वृन्दमां एक यशोज्ज्वल अने अग्रगण्य विद्वान् साधुपुरुष छे. तेमनी रचनाओ तेमने संस्कृतना महान् कविराजोनी हरोळमां मूकी आपे तेवी प्रगल्भ अने प्रासादिक होय छे.

तेमनो सत्तासमय १७मा शतकनो पश्चार्द्ध अने १८मा शतकनो पूर्वार्द्ध छे. तेमणे अनेक विषयो पर अनेक रचनाओ संस्कृत आदि भाषाओमां करी छे, तेमना समयमां संस्कृत-काव्यात्मक पत्रलेखननी प्रवृत्ति खूब विकसेली हती. अनेक विद्वान् मुनिराजो पोतपोताना गुरुजनो पर लांबा अने विद्वत्तानी चमत्कृतिओथी भरपूर एवा पत्रो लखता-मोकलता. आ पत्रोने 'विज्ञप्तिपत्र' ना नामे ओळखवामां आवे छे. पोतानामां रहेल सर्जनात्मक उन्मेषने उजागर करवानुं आ पत्रलेखन एक सबळ माध्यम आ समयमां बनी रहेलुं. महोपाध्याय मेघविजयजीए पण आवा अनेक पत्रो लख्या हता, जेमांना बे विज्ञप्तिपत्रो - १. मेघदूत समस्यापूर्ति-विज्ञप्तिलेख अने २. विज्ञप्तिका एवा नामे श्रीजिनविजयसम्पादित 'विज्ञप्तिलेखसंग्रह' (ई. १९६०, सिंघी सिरीझ)मां प्रकाशित छे. प्रथम पत्र औरङ्गाबादथी गच्छपति विजयप्रभसूरि उपरनो छे, तो द्वितीय पत्र द्वीपपत्तने (दीवबन्दरे) विराजता गच्छपति श्रीविजयदेवसूरि उपर लखायेल छे. लेखन/रचना-वर्ष कोई पत्रमां नोंधायेल नथी. बन्ने पत्रोमां अनुक्रमे १३० तथा १२५ पद्यो छे, जे काव्यतत्त्वनी दृष्टिए अद्भुत गणाय तेवां छे. तेमां पण प्रथम पत्र तो कविकुलगुरु कालिदासना मेघदूतकाव्यनी पादपूर्तिरूप छे, जे अनेक रीते महत्त्वपूर्ण छे. ए पत्रना छेडे तेमणे एक श्लोकमां[१] आपेली नोंध प्रमाणे तेमणे माघकाव्यनी पादपूर्तिरूप विज्ञप्तिपत्र विजयदेवसूरि उपर लखेलो हतो. आ पत्र अद्यावधि उपलब्ध या प्रकाशित होवानुं जाणमां नथी. विज्ञप्तिलेखसंग्रहना प्रास्ताविकमां श्रीजिनविजयमुनिए नोंध्युं छे ते प्रमाणे,

---

१. माघकाव्यं देवगुरोर्मेघदूतं प्रभप्रभोः ।
समस्यार्थं समस्यार्थं निर्ममे मेघपण्डितः ॥ (विज्ञप्ति लेखसंग्रह, पृ. १०६)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेमणे एकत्र करेल तथा प्रगट करवा धारेल पत्रसंग्रह (बीजो भाग)मां ए पत्र-काव्य होई शके. परन्तु ते सामग्री आजे तो कालग्रस्त थई दीसे छे. कोई संग्रहमां आ पत्र के तेनी नकलरूप प्रत होई शके. कोई बुधजन ते प्रकाशित करशे तो बहु आनन्द थशे.

अहीं प्रगट थतो पत्र ते अद्यावधि अज्ञातप्राय एवो 'सेवालेख' नामक पत्र छे, जे बर्हानपुरे चोमासुं रहेला श्रीमेघविजयजीए दीवबन्दरे विराजमान गच्छनायक श्रीविजयप्रभसूरि उपर लखेल क्षमापना-पत्ररूप छे, अने तेनुं श्लोकमान १९० छे.

आ सेवालेखनी एकमात्र प्रति श्रीकान्तिविजयजी भण्डार (वडोदरा के छाणी)मां छे, अने त्यां तेनो क्रमांक २२६३/२ एम छे. तेनी झेरोक्स नकल परथी आ सम्पादन करवामां आव्युं छे. आ प्रति प्राचीन नथी, परन्तु वीसमा शतकनी होय तेम जणाय छे. कदाच श्रीकान्तिविजयजीए ज तेनी नकल लखावी होय तो बनवाजोग छे. प्रति अशुद्ध घणी छे. छ पत्रनी प्रत छे.

प्रारम्भना ३३ श्लोकोमां जिनप्रतिमा अने तेना परिकरनुं वर्णन छे, अने ३४ थी ५३ मां मनमोहन पार्श्वनाथनुं वर्णन छे. ५२मा श्लोकमां अन्य जिनबिम्बोनो पण उल्लेख थयो छे. कुल ५३ पद्योमां जिनवर्णन थयुं छे.

ते पछी सौराष्ट्रदेशनुं अने द्वीपबन्दरनुं वर्णन छे (५४-७६). ते पछी बर्हानपुरनुं वर्णन छे (७७-९०). ते शहेरमां साधु (शाह)रूपजीनो उपाश्रय छे (९१), तेमां व्याख्यागवाक्ष अर्थात् व्याख्याननी पाट छे तेमज तेना उपर चन्द्रोदय-चंदरवो होवानुं पण वर्णन थयुं छे (९३-९४). व्याख्यान श्रवण करनारा प्रबुद्ध श्रोताओ द्वारा 'तहत्ति' शब्द द्वारा अपाता, वक्तानो उत्साह-उन्मेष वधारनारा होंकारा नुं पण बयान थयुं छे अहीं (९७). ९८-९९मां धनजी, जिनदास जेवा श्रावकोनां नामो वणवामां आव्यां छे. १०१मां श्राविकाओनी तपश्चर्या विशे निर्देश थयो छे. बुरानपुरनो शासक अवरंगशाह होवानो निर्देश ११३ अने ११७ द्वारा मळे छे. ११८मां पोताना गुरुना आदेशथी आ लेख लखी रह्या होवानुं, पोताना नाम साथे, कर्ता निर्देशे छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

११९ मा पद्यथी समाचारवर्णन थाय छे. पन्नवणा सूत्र, जीवाभिगमसूत्र वगेरे आगमशास्त्रो पर व्याख्यान चाली रह्यां होवाना (१२९-३०), तथा पाणिनिव्याकरण–महाभाष्य, सिद्धहेमव्याकरण तथा अनुभूतिस्वरूपाचार्यना ग्रन्थोनुं अध्ययन शिष्योने चालतुं होवाना (१३१) तेमज साहित्यग्रन्थोनो तथा नयवादनो अभ्यास चालतो होवाना (१३२) समाचार मुख्य छे. योगोद्वहन तथा उपधाननी क्रियाओना (१३३), स्नात्रना तथा अष्टाह्निका महोत्सवोना (१३४–३५) तथा पर्युषणापर्वना पण समाचार लख्या छे. चैत्यप्रवाडी (१४१–४६)नी पण विगते नोंध छे. १४७मां वार्षिक प्रतिक्रमणनी तथा खमतखामणांनी वात थई छे.

१४८ थी पारणानुं वर्णन थयुं छे. धनजी श्रावके स्थानिक तपस्वीओनां पारणांनो अने कल्लूश्रावके देशावरना आराधकोनां पारणांनो लाभ लीधो छे (१४९). १५१ थी १५६ मां भोजनना मीठां पक्वान्नोनुं रोचक वर्णन थयुं छे. तेमां पण 'जलेबी' नामनी परदेशी मीठाईनुं वर्णन अद्भुत छे : "साकर-घीथी मिश्रित जलेबीनां त्रण वलयो ते त्रण रेखाओथी वींटायेल ह्रींकाररूप बीजमन्त्र–समान दीसे छे. ह्रींकारनो प्रयोग यन्त्रोमां पिशाचादि तत्त्वोनो नाश करवा माटे थाय छे तेम आनो प्रयोग क्षुधा नामक पिशाचीना नाश माटे छे," आम वर्णवीने कवि पोतानी प्रतिभानो नवलो चमकारो देखाडे छे. पद्य १५५मां 'पीरसवुं' क्रिया माटे 'परीप्सितं'नो प्रयोग ए जैन संस्कृतनी आगवी लाक्षणिकता दर्शावतो प्रयोग छे. आ पछीना श्लोकोमां गुरुवर्णन छे, अने अन्तिम बे पद्योमां उपसंहार थयो छे.

कुल श्लोको १९० छे, केमके १५३ मा श्लोकना बे पाठ छे. तेने जो गणनामां न लईए तो १८९ श्लोको गणाय तेम छे.

सेवालेखनुं समग्र वांचन करतां ते एक सरस अने समर्थ काव्यरचना होवानुं प्रतीत थया विना रहेतुं नथी. कर्ता कविए ठेरठेर पोतानी चमत्कृतिजनक कविप्रतिभा पाथरी छे, तेवुं आ अशुद्ध वाचना वांचतां पण स्फुटपणे समजाय छे. जो आनी शुद्ध वाचना मळे तो तो केवी मजा पडी जाय ! अस्तु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सेवालेखः ॥

स्वस्ति श्रीः प्रसभं सभासु भगवत्पादाग्रजाग्रन्नखान्
दृष्ट्वा तत्र हिमांशुमण्डलमिलत्प्रेमानुलोम्यादिव ।
आगत्य स्थिरतारता समभवन्नित्याश्रमाशाऽश्रमात्
प्रीतिं संस्पृशती सितांशुनलिनस्थानद्वयीसम्भवाम् ॥१॥

यद्वा-

स्वस्तिश्रिया बोधिविधोर्मृगोऽयं भ्रातुः करक्तेन चिदाग्रहेण ।
नष्टोऽप्यनुष्टः समतिष्टदिष्ट-र्हदास्यपीयूषमयूखदृष्टैः ॥२॥
वैकुण्ठकण्ठं परिहृत्य स(?) तस्मात् पयोधिपुत्री जिनपादपद्मे ।
स्थिता तमाधाय मृगं मृगाङ्कः शङ्के बभूवाऽभयदस्ततोऽयम् ॥३॥
श्रियः स्थितेश्चिह्नमिहास्ति हस्ती सिंहासने वाहनमेतदीये ।
परेऽपि नागाः कमलाऽभिषेक-क्रियानुरागादिह किं भजन्ति ॥४॥
पयोधिपुत्र्या इति सन्निधाने-ऽप्यहो ! महीयान् महिमा जिनस्य ।
यद् गीयते योगिवरैरजस्रं शिवः स्वरूपेण महाव्रतीति ॥५॥
महाव्रतित्वं किमवेत्य सत्या-नुरागयोगादिह पार्वतीयम् ।
देव्याः स्वरूपात् प्रभुमभ्युपेता विचित्ररूपत्रिदशैः परीता ॥६॥
असह्यवीर्यप्रभयानुविद्धां भयानुविद्धाङ्गभृतां नितान्तम् ।
रक्षासु दक्षां समवेत्य गौरीं सिंहो मनस्ताल इवाऽत्र तस्थौ ॥७॥
सिंहोऽद्वितीयः प्रभया द्वितीयः सिंहासनेऽस्य प्रतिमेव रेजे ।
श्रीवीरलक्ष्मेव निजं सिसक्षुः किमाविरासीदविहार्यधैर्यः ॥८॥
दि(दे)ही महोत्साह इवैष सिंहः स्याद्वाहनं चेज्जिनसेवनेन ।
तदाऽन्तरिक्षाक्षयमार्गमेन-मुल्लङ्घ्य वेगात् समुपैमि पारम् ॥९॥
इतीव विस्तीर्णसहस्रचञ्चत्करः प्रभाकृत् किमुपाजगाम ।
भामण्डलस्य च्छलतोऽच्छमूर्तिः ससाश्वसंवाहनकर्मखिन्नः ॥१०॥
मन्येऽस्य भूयः प्रसरत्य(त्प्र?)तापसन्तापतः क्लिश्यतु मैष लोकः ।
जिनप्रणामे तदसावशोक-व्याजेन किं नन्दननिष्कुटोऽगात् ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्गन्धसम्बन्धपरम्पराभि-राकृष्टचेता इव नाकिनेता ।
किमुह्यमानः सहजेन भानो-र्भानोदिताशेषतमाः समायात् ॥१२॥
तत्प्रेमपीयूषभराभिमत्ता रम्भा इवेयुर्जिनपूजनार्थम् ।
पुष्पाण्युपादाय विधाय माला-मालापरम्यास्त्रिदशाभिगम्याः ॥१३॥
भानुप्रभोज्जृम्भिसहस्रपत्र-नेत्राः स्वनेत्रा[णि] समुल्लसन्ती(न्ति) ।
ताः प्रेक्ष्य सम्यग् निजनेत्रसाम्य-प्रेक्षाकृतेऽस्थान्मृगयुग्ममेतत् ॥१४॥
तत्सङ्गमायेव निजैणबालं कृताशयं शीतरुचिर्विचार्य ।
किमातपत्रत्रयकैतवेन त्रिमूर्तिभर्ता समुदीत एषः ॥१५॥
करप्रसारात् किममुष्य पुष्यत् श्रीधर्मचक्रव्यपदेशनेन ।
सपल्लवं कैरवमेतदुच्चै-श्चिराय रोचिः शुचि संचिनोति ॥१६॥
निजोदयस्याऽव्यभिचारिचिह्न-मालोच्य कामः समयं सकामम् ।
ववर्ष रोषादिव पुष्पबाणै-र्जेतुं जगत्यां विजयी जिनेन्द्रम् ॥१५(१७)॥
अयं प्रभुश्चामरचामरौघैः संवीज्यमानः कृतदिव्यरूपः ।
आरुह्य सिंहासनसिंहमुच्चै-रवादयद् दुन्दुभिमन्तरिक्षे ॥१६(१८)॥
तत्राद एव स्मरनिर्जयाय बभूव शक्तस्तत एव युक्तम् ।
जगत्प्रभोः पाणितले शयालु-र्मीनस्तदीयध्वज एष पीनः ॥१७(१९)॥
अदानमीनस्फुरितसिशोभ-स्मराभवत्पाणिपया(यो)जराजि ।
जिनार्यपर्या(र्य?)ङ्कसरो विरेजो(जे) रजोवियुक्तद्युतिपूरनीरम् ॥१८(२०)॥
श्रीदक्षिणामुख्यपुर(रे?) निवासी, जिनोऽस्त्यगस्तिस्तत एव मन्ये ।
पयोनिधिः पूर्वनिपान(त?)भीतोऽन्वास्तेऽत्र पर्यङ्कसरःश्रिया किम् ?
॥१९(२१)॥

संक्रान्तकान्तद्युतिपल्लवश्री-कंकेल्लिरूपामरवृक्षलक्ष्यः ।
छत्रत्रयस्य प्रतिबिम्बनेन यः सम्भवं सूचयति स्म राज्ञः ॥२०(२२)॥
नागादिदेवप्रतिमाविशेषै-र्यो मथ्यमानः प्रतिबिम्बवेषैः ।
चलाचलैः कान्तिजलैरजस्रं संक्षोभशोभामुदयाम्बभूव ॥२१(२३)॥
शिलान्तरोट्टङ्कितहस्तिमल्ला चित्रार्पितोच्चैःश्रवआदिबिम्बैः ।
आलोड्य धामं छुरयं सकंछु(?) र्बभाविहेषत्स्मितपुष्पयोगात् ॥२२(२४)॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रादुष्करोतीव दिवोऽम्बुजाक्षीः साक्षी यतोऽयं प्रणमद्वधूनाम् ।
वपुःप्रतिच्छन्दभरच्छलेन प्रसूनपुञ्जेन स फेनपिण्डः ॥२३(२५)॥
जिनेन्द्रमूर्तेः पुरतः स्फुरन्तः स्नेहप्रियाः स्वप्रतिमाक्रियाभिः ।
उदर्भिषं वाडवहव्यवाहं प्रज्ञापयन्तीव नमज्जनानाम् ॥२४(२६)॥
जिनस्य शीर्षे ननु शातकुम्भः कुम्भः स पर्यङ्कपयोधिमध्ये ।
संक्रान्तमूर्तिर्वरपूर्णकुम्भ-समुद्भवं ख्यापयतीव मन्ये ॥२५(२७)॥
प्रसारयामास दिशां चतुष्के कीर्तीः स मूर्तीरिव यः स्वकीयाः ।
मुक्तावलीशालिविभूषणानां परिस्फुरद्बिम्बकदम्बकेन ॥२८॥
उद्यद्दिवारत्नसपत्नपाद-द्वयी नखाङ्कुरमयूखपूरैः ।
प्रवाललीला(लां) विदधेऽत्र सिन्धौ मूर्तैरिवार्हद्वदनेन्दुरागैः ॥२९॥
स्नात्रार्थिनः पूर्णकरीरहस्तात्र मन्यते कः समवेक्ष्य तत्र ।
सुधार्थधावद्विबुधान् विधानै-रम्भोधिमन्थप्रसृतावधानैः ॥३०॥
रसाग्रहादेव नवग्रहाः किं स्थितास्तमालोक्य तटस्थरीत्या ? ।
जिघृक्षवः श्राद्धवधूविकीर्णा[न्] वर्द्धापनामौक्तिकसौधबिन्दून् ॥३१॥
पर्यङ्कपाथोवि(नि)धिमुल्लसन्तं मंशुरूपै(?)श्चलाचलैर्वीचिभि[रु]ल्लसन्तम् ।
हसन्तमेकत्रिदिवे वसन्तं जनं घनै रत्नधनैः श्वसन्तम् ॥३२॥
स्वस्तिश्रियाऽऽलोक्य निजैः प्रसङ्ग-मभङ्गमुत्सङ्गगतं मनोऽन्तः ।
विचिन्तयन्त्येव पितुर्विशेष-प्रीत्याऽधितष्ठे जिनपादपद्मे ॥३३॥

**अथाऽस्मिन्नेवाधिकारे श्रीमनमोहनपार्श्ववर्णनम् ॥**

अथात्र विश्वत्रितयी जनानां प्रियां प्रियान्तां समवेक्ष्य साक्षात् ।
स्वयं सिसक्षु**र्मनमोहनाख्य-पार्श्वश्रिया** श्रीपतिराजगाम ॥३४॥
जाग्रद्दशा ह्यस्य दशावतारा भवावतारा इव मूर्तिभाजः ।
अगण्यपुण्यर्द्धिसमृद्धियोगा-ज्जाता नृणां दुर्नरकादिभित्त्यै ॥३५॥
अस्याऽभिधानाक्षरसन्निधान-व्यामुह्यमाना अपि मानवौघाः ।
सव्यासमुक्तीन्दुमुखी विलास-चातुर्यकेली कलयन्ति चित्रम् ॥३६॥
शेषोऽपि निःशेषभुजङ्गरत्नं यत्नेन पर्यङ्कविधां विधित्सुः ।
निषेवते देवमिमं फणाभिः छत्रस्य शोभां रचयन्नदम्भाम् ॥३७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्ये तदुत्सङ्गरुचां प्रचारै-रुद्यद्भिरिन्दुप्रतिमानुसारैः ।
परीवृतोऽयं भगवान् बभूव श्यामोऽपि नामोदितशुभ्रधामा ॥३८॥
नाथस्य नामापि सुधाब्धिपाथः, पापाग्निसन्तापविनाशनाय ।
यत्कण्ठपीठे लुलितं जनाः स्यु-र्निरञ्जनास्तेऽञ्जनरूपिणोऽपि ॥३९॥
भक्तिप्रसक्तैर्मनुजैर्जिनस्य विधीयते पूजनकर्म मोदात् ।
तेनैव वाल्हीकविलेपनेन प्रभुः स पीताम्बरतां बभार ॥४०॥
फणाशिरःस्थाष्णुसुराध्वरत्न-सपत्नरत्नावलिरुल्लसन्ती ।
आरात्रिकस्यात्र बिभर्ति लीलां, प्रभोः पुरस्तान्नितमां तमोघ्नी ॥४१॥
ज्वलद्विचित्रौषधिलब्धभासं श्रीमान् जिनः कोटिशिलां विलासात् ।
समुद्दधारेव मणीविचित्र-फणातपत्रव्यपदेशतः किम् ? ॥४२॥
फणामणिश्रेणिमिषेण मन्ये तारा बभूवुर्वसुधावताराः ।
प्रभोर्धरोद्धारधुरन्धरस्य किमस्य वक्त्रे शशिनिश्चयेन ॥४३॥
अनेकशो भासुरसंभू(?)तानि, व्यगाहतास्य त्रिपदी जगन्ति ।
आविर्बभूवुर्भुवनस्य भावा दिव्याः करस्था इव तज्जनानाम् ॥४४॥
किमातपत्रत्रयकैतवेन त्रयं समुद्धृत्य वसुन्धरा साः(याः?) ।
कन्दायिस्यन्दविमुक्तशेषं(?) दधौ जिनेन्द्रः पुरुषोत्तमत्वम् ॥४५॥
उरीकृताशेषविशेषरोचि-र्निधाय शेषाहिफणाकिरीटम् ।
मणिप्रभोद्दीपितदिग्विभागं विवाहरूपं विदधे जिनेन्द्रः ॥४६॥
स्वस्तिश्रियाः पाणिनिपीडनस्य महे महोत्साहधरं तदेनम् ।
मत्वेव नेमिर्भगवानजन्य-हन्तात्र जन्योऽजनि सोदरत्वात् ॥४७॥
स पाञ्चजन्यो हरिशङ्खरत्न-माध्मायि यन्नेमिजिनाधिराजा ।
तत् श्वाससौरभ्यभरातिलोभा-ल्लक्ष्मश्रियाऽशिश्रियदंह्रिपद्मम् ॥४८॥
जिनांह्रिपद्मद्वयजन्मशोभा-पराभिभूतं किमु पुण्डरीकम् ।
त्रिरेखदम्भाद्विनयेन किञ्चित् संकुच्य सेवां तनुते तदीयाम् ॥४९॥
गलस्थलेनस्तदियं त्रिरेखी स्वरत्रयस्योदयमत्र वक्ति ।
त्रिरेखरेखास्तव तद् वृथेति आध्माय शङ्खं वदति स्म नेमिः ॥५०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्तिश्रियामाश्रयसन्निभेऽस्मिन् पुरे त्रयीयं जिननायकानाम् ।
वृत्तादिवा[-]त् समगच्छताऽस्य विश्वत्रयीमण्डनतां वदन्ति ॥५१॥
अन्येऽपि मन्ये **सुमति-स्वयम्भू-श्रीवासुपूज्य-त्रिशलाङ्गजाद्याः** ।
जिना जगत्यग्र्यपदं तदेतद् विचिन्त्य बिम्बैः सुजनं पुनन्ति ॥५२॥
तत्त्वार्थ-तत्त्वाध्यवसायधीर-स्तान् वस्तुतो भक्तिनमस्कारा- (?) ।
विधेयभात्रेन विधेयमेतत् सोऽहं समीहे विगतान्तरायम् ॥५३॥

इति श्रीजिनवर्णनद्वापञ्चाशिका ॥

स्वस्तिश्रिया स्वीयशरीरजाया जनाश्रयोऽध्यापनहेतवेऽयम् ।
सज्जीकृतोऽम्भोनिधिनाऽधुना किं स्फुरत्**सुराष्ट्रा**विषयस्य लक्षात् ॥५४॥
प्रदक्षिणार्चिर्निचयं तपोऽग्निं विधाय संवीतवलक्षवासाः ।
द्विजेशवत् सूरिपुरन्दरोऽयं तनोति तत्रागमनोऽत्र पाठाम्(?) ॥५५॥ युग्मम् ॥
देशा निवेशा इव नाकभाजां पीयूषपानप्रणिधानगोष्ठ्याम् ।
रसप्रवेशोल्लसदुच्चतालाः सहस्रशः सन्ति वसन्ति भूम्याम् ॥५६॥
राष्ट्रः **सुराष्ट्रा** जगतीप्रतीतो नूनं सुधर्मा जयति द्विधापि ।
यत्र नगरे प्रभु नाकनेता (?) मुदा विहारं कुरुते पवित्रः ॥५७॥
देशः **सुराष्ट्रा**भिधयाऽभिधेयं व्यनक्ति सौभाग्यसुखाद्यमेयम् ।
भेदोऽप्यभेदोऽभिधयाऽभिधेय-स्याख्यायते तेन तथाऽनुमेयः ॥५८॥
सत्यापयत्यस्य समस्तदेशा-धिपत्यमुच्चित्य विभामचिन्त्या[म्]।
**सिद्धाचलः** काञ्चनमौलिलीला-मुत्तुङ्गशृङ्गैः कलयन्नजस्रम् ॥५९॥
पयोनिधिश्चञ्चलवीचिहस्तै-र्नृत्यन्मृदङ्गध्वनिगर्जितेन ।
पुरोऽस्य देशस्य महोत्सवानां नित्यत्वमाविःकुरुते प्रजासु ॥६०॥
पुरी सुरीणामपि वर्णनीया **द्वीपा**ख्यया यद्विषयेऽस्ति शस्ता ।
समागता सिन्धुदिदृक्षयाऽसौ प्रभावभृत् पुण्यजना प्रभेव ॥६१॥
पीनोज्**ज्जयन्ताचल-सिद्धशैल**-स्वरूपविस्फारिपयोधरायाः ।
देशश्रिया **द्वीपपुरं** तदेतत् विराजते वक्त्रसहस्रपत्रम् ॥६२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्सत्पुरीयं परमर्द्धिपूर्णा नित्यं निरालम्बतयेव खिन्ना ।
पयोनिधेः सन्निधिमेत्य मन्ये स्थिता यतोऽस्यां विबुधा वसन्ति ॥६३॥
वादेन भग्ना जलधौ निमग्ना लङ्काऽथ तां जेतुमनाः पुरीयम् ।
पटालयान् श्रृङ्खलकोष्ठकस्य च्छलादिवाऽदापयदब्धितीरे ॥६४॥
रत्नाकरोऽब्धिर्जनसन्निवेशो द्वीपोऽप्ययं तन्मिलनाय पूर्वम् ।
प्रसारयामास भुजं स एव बिभर्ति शोभां परिखाऽब्धिदम्भात् ॥६५॥
द्वीपेन सार्द्धं नगरी गरीयः श्रिया विवादं सृजती सुराणाम् ।
नंष्ट्वा ययौ क्वापि नभःप्रदेशे तदन्तरीयं परिखा पयोधिः ॥६६॥
देशा नरेशा इव यन्निदेशा-नुवर्तिनः पोतमिषात् करीन्द्रान् ।
उपाहरन्ते पुरचक्रभर्तु-र्द्वी - - - पूज्यांह्रिकिरीटमौलैः ॥६७॥
यत्राङ्गनाश्च(च?)ङ्क्रमसङ्गमेन पराजितां वीक्ष्य सुतां पयोधिः ।
तद्रूपसम्पत्तिषु मन्दमोह - - - कृष्णाय दत्त(त्ते)स्म जरन्नराय ॥६८॥
द्वाषस्सवषु वरा (द्वीपः स सर्वेषु वरो)ऽस्ति जम्बू-द्वीपो यथाऽर्केन्दुकृतप्रकाशः ।
द्वीपस्तथा सर्वपुरावनीपौरामेय-वामेयजिनाप्तवासः ॥६९॥
पयोनिधिस्तुङ्गतरङ्गहस्तै-र्यत्सालमुत्सारयितुं प्रवृत्तः ।
वेलाबलेनाप्यफलप्रयत्नो, लज्जावनम्रोऽथ निवर्तते द्राक् ॥७०॥
यद्वासिहारिव्यवहारिलोकै-र्भास्वत्त्रिपद्याश्रयणात् सदङ्गैः ।
पराजिताः सन्ततदानवृत्त्या मतङ्गजा तन्न विशन्ति मन्ये ॥७१॥
विद्याविनोदैः समयं नयन्तः श्रीमद्गुरोः सेवनंया(नमा)श्रयन्तः ।
साभोगभोगैर्नितमार्जयन्तः सुखं वसन्ति व्यवहारवन्तः ॥७२॥
विचारचातुर्यदशां(शा)दशां(शा)स्या-दानप्रवाहैर्विहिताब्दहास्याः ।
श्रीपूज्यतीव्रद्युतिपाददास्या-न्नित्यं प्रसन्नीभवदम्बुजास्याः ॥७३॥
गीतार्थसार्थस्य गुणैर्मणीभिः कण्ठस्य येषां प्रभवेद् विभूषा ।
ते कस्य न सु - - नोपकार- संस्कारिणः श्राद्धवराः सुखाय ॥७४॥
तदीयचातुर्यमरालबालो-ऽस्माकं मनोम्भोरुहि यच्चिखेल ।
तत्पक्षशुभ्रत्वगुणप्रसङ्गात् वलक्षताऽद्यापि च लभ्यतेऽत्र ॥७५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपासिकाः श्रीगुरुवक्त्रपद्म-श्रुताक्षयस्यन्दमरन्दपानात् ।
भृङ्गाङ्गनावत् पुरकाननेऽस्मिन् प्रोद्भावयन्ते सुरभिस्वभावम् ॥७४॥
यत्रालयः पालयतां यतित्वं क्वचिच्चतुस्त्र्यस्रसुवृत्तरूपैः ।
नानाविमानाकृतिभृद् व्यनक्ति स्वस्याश्रयत्वं विबुधेश्वराणाम् ॥७५॥
महोदधेः श्रीवसुधावधेर्वा यो देहलीदीप इव प्रकाशी ।
द्वीपोऽवनीपेन तपोधनानां विभूष्यते श्रीमति तत्र चित्ते ॥७६॥

## अथ बर्हानपुरवर्णनम् ॥

स्वस्तीन्दिरोद्वाहजनाश्रयेऽस्मिन् संस्थानमष्टापद[शा]ब्दभास्ते ।
प्रोत्तुङ्गशृङ्गा भगवद्विहारा-स्तदत्र सारिश्रियमाश्रयन्ति ॥७७॥
श्रद्धा-परिज्ञान-चरित्ररूपै-रक्षैः [पुरा]स्कृत्य दिवं शिवं वा ।
दक्षोऽत्र लोको रमते विहार- सारीषु नानाम्बरचित्ररूपैः ॥७८॥
यत्राऽर्हदुच्चैस्तरचैत्यपंक्ति-र्मुक्तालतावद्वि—लादिदीपे ।
पुरी स्मिती(तां)भोजदृशः प्रशस्त-तन्मण्डपोत्तुङ्गपयोधरायाः ॥७९॥
यत्राऽर्हतां सुन्दरमन्दिराली, पालीव पुण्याम्बुमहासरस्याः ।
यां प्राप्य सर्वो भविनां प्रयाति, भवाटवीभ्रान्तिभवः प्रयासः ॥८०॥
सूर्याश्मसन्दर्भितभित्तिभागे तापोऽपि सूर्योदय - - - - - ।
...... नृत्यद(द्?)धनवीजनेना-पनीयतेऽर्हद्भवनैरमुष्याः ॥८१॥
विशालसौधोज्ज्वलचन्द्रशाला-विलासिनी काचिदवल्यबोधम् (?) ।
- - - बिम्बं तदभूत् कलङ्क-स्तदीयनेत्राञ्जनरञ्जनेन ॥८२॥
सर्वः सुपर्वोचितवि(वे)षशाली, जनस्तदाच्युतसव(स्सदाऽस्त्युत्सव) सज्जनोऽत्र ।
शृङ्गारतामेति समग्रपुर्याः चातुर्यसर्वस्वमिवाङ्गसङ्गि ॥८३॥
स्त्रियोऽपि नेपथ्यविशेषभाजो रथ्यासु सानाध्य(थ्य)भृतः स्फुरन्त्यः ।
हरन्ति चेतांसि दिवापि यूनां स्मराम्बुधेरुत्कलिकास्वरूपाः ॥८४॥
अप्रत्नरत्नप्रतिबद्धसौधे दैवात् कथञ्चिद्विजनेऽपि जाते ।
भुजङ्गसङ्गेऽपि न पांशुलानां स्वाभीष्टसिद्धि प्रतिबिम्बभीतेः ॥८५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्दह्यमानागुरुधूमभूम्ना घनान्धकारे समुदित्वरेऽत्र ।
वृष्टिर्मरुत्कीर्णशशाङ्करत्न-पयःपृषद्भिर्नियतैव रात्रौ ॥८६॥
चकोरकान्ता द्विजराजतेज-स्तथा रथाङ्गाह्ववधूर्दिनेशम् ।
समीहते तद्द्वयमोदमेषा पुरीन्दुसूर्याश्मरुचा तनोति ॥८७॥
मणीमये कुट्टिमभूमिभागे कृतावतारा निशि यत्र ताराः ।
मनोभवेन प्रतिसद्म मुक्ताः प्रसूनबाणा इव रेजुरुच्चैः ॥८८॥
यद्वासवेश्मन्यपि दम्पतीनां रहो रते विस्फुरितं बभूव ।
संक्रान्तमेतन्मणिभित्तिभागे कौशल्यमाविःकुरुते परेषाम् ॥८९॥
परस्परात्मु(मु)त्सवसन्निधाने यद्रक्तचूर्णोत्किरणं जनानाम् ।
जाते प्रभातभ्रम एव तस्मा-न्निःशोकतां याति च कोकलोकः ॥९०॥
यत्रास्ति नव्यः खलु भव्ययोग्यः उपाश्रयः साधुजनस्य भोग्यः ।
मूर्तैर्यशोभिर्धवलः **सुसाधोः श्रीरूपजीकस्य यथार्थनाम्नः** ॥९१॥
यो राजधानीव जिनेन्द्रधर्म-महीशितुर्निर्मलशासनस्य ।
यद्वा सुधर्मेव सभा सभासी स्थितोऽत्र वज्री भगवन्निदेशः ॥९२॥
द्वारत्रयेणाऽभिपतज्जनाली-सरित्त्रयस्यात्र भवन् प्रसङ्गः ।
प्रयागतां वैश्रमणालयस्य **व्याख्यागवाक्षस्य** जने व्यनक्ति ॥९३॥
**व्याख्यागवाक्षः** प्रकटो वटोऽयं सचित्रपत्रप्रकरात्तशोभः ।
सच्छायभावेन रराज तस्मा-च्चन्द्रोदयस्यात्र विभा विशीर्णा ॥९४॥
पुष्पैः फलैः सत्किशलैर्दलैर्वा समन्वितौ चित्र-वसालवृक्षौ ।
पार्श्वस्थितौ श्रीगुरुभक्तिभाजां सदाफलित्वं वदतः स्फुटोक्त्या ॥९५॥
सिद्धान्तशास्त्रश्रुतिपूर्णकर्णाः श्राद्धा गुरूणां बहुदानकर्णाः ।
गीतार्थसार्थस्य विशेषवाचो-ऽलङ्काररूपा व्यवहारभाजः ॥९६॥
यन्मानसोद्यत्कषपट्टिकायां सुवर्णपिण्डस्य भवेद्विशुद्धिः ।
कथाप्रसङ्गस्य '**तथास्तु**'वाचो यत्सन्निधानात् समुदेति बुद्धिः ॥९७॥
शय्यातरोदाहरणे धुरीणः प्रवीणभावात्र सुवर्णदासी । (?)
श्राद्धोऽनुरक्तो मविसंवरेध(?) वृद्धः समृद्धो **धनजी**ति नाम्ना ॥९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घनं धनं प्राप्य **जिनस्य दासः** श्रेष्ठी–दिष्टे यतिमार्गभेदे ।
शिवोऽवगौरी–तिरुज्ज्वलश्रीः कौलेयको वैश्रवणः स्वरूपात् ॥९९॥
अर्हद्गुरुज्ञानसमुच्चयानी(?) साधारणं वानुभवन्ति सारम् ।
तेनैव तद्भाविभवस्य वृद्धि–र्वृद्धार्हतानामनुमीयतेऽत्र ॥१००॥
श्राद्धा(द्ध्य)श्च काश्चिद् गुरुभक्तियुक्ता मुक्तालतां तन्निव (?)सद्गुणौघाः ।
तपोविशेषैः किमु दिक्पटानां स्वं मुक्तरूपं कथयन्ति साक्षात् ॥१०१॥
श्राद्धा(द्ध्य)श्चतस्रो विशिखा इवात्र स्वरूपतस्तीर्थमहापुरस्य ।
तपो विचित्रं प्रणयन्ति पुण्य–सुरद्रुमस्येव विशालशालाः ॥१०२॥
वैराग्यवैरस्यदशां स्पृशन्त्यः क(का?)श्चिद् गृहा एव तपोधनानाम् ।
आदाविवान्तेऽपि भजन्ति मौनं क्षणस्य गानेऽर्थविचिन्तयेव ॥१०३॥
स्वर्णं न रूप्यं यदि वाऽदनाय स्यादित्यवेत्येव युगं तदत्र ।
शालेस्तुबर्याश्च मिषेणमन्ये संयुज्य भोज्याय नृणां बभूव ॥१०४॥
शाल्योदनस्तौबररूपमिश्रो यद् भुज्यते साज्यतया विशेषात् ।
पद्मावदाता यदि वास्ति लेश्या तद्भोजमानामिह भोजनानाम् ॥१०५॥
यस्मिन्ननेकस्मितरश्मिवेश्म– चान्द्रेन्द्रनीलादिमणीसमूहान् ।
दृष्ट्वा बुधाः सिन्धुमतोऽधिकं नो वदन्ति रत्नाकरवर्णनेन ॥१०६॥

तथा हि–

महोदधेस्तन्मथनव्यथायां प्राप्तानि रत्नानि चतुर्दशैव ।
अत्रान्वहं रात्रिकरत्नराजी पान्थैर्गृहीतापि तथाऽनुभूता ॥१०७॥
स्वर्गेऽपि नास्मादधिका विभूति–र्यद्द्वादशैवांशुकरा हि तस्मिन् ।
उच्चैःश्रवो–देवगजेदवो(जादयो?)ऽपि, तत्रैकरूपा इति कीर्त्यते जैः ॥१०८॥
प्रत्यापणं रत्नविवेचकानां शीतांशुभास्वन्मणयो ह्यनेके ।
हरेर्गजाश्वस्य जये समर्थं नरेश्वरस्याऽश्वगजं सहस्रम् ॥१०९॥
यत्रोच्छलत्तुङ्गतुरङ्गरूपैः क्षुण्णा खुरैर्व्याकुलितेव भूमिः ।
समीरणोदीरितरेणुदम्भा–दम्भोधिमध्येन नु पित्सतीव ॥११०॥
आश्वासनायेव भुजं गजेन्द्राः स्वगण्डदानोदकवर्षणेन ।
विधाय किञ्चित् सरसां विवेकः शनैः शनैस्ते पदमादधानाः ॥१११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रादुर्भवत्किञ्चिदरालदन्त-च्छलादिवाऽऽकृष्य विधुं वियत्तः ।
उत्क्षिप्तशुण्डाः करिणः सृजन्ति दृष्टेन्दुदर्शं कुहुमंगमैआत् (?) ॥११२॥
पुरीपुरन्ध्र्या वसुधाधवेन केनाप्यदत्तां कटिमेखलां द्राक् ।
वप्रश्रियादादवरंगसाहिः कूलङ्कषा चारुदुकूलवत्याः ॥११३॥
यस्य प्रतापोग्रहुताशनाग्रे, भ्राताऽनुजस्तन्मयतामवाप ।
जितोऽग्रजन्माऽप्यमुना रयेण चक्री यसद्यौ (?)(च पूज्यो?) वहलीनृपेण ॥११४॥
एतत्प्रबन्धप्रतिबन्धबद्ध-सन्धो जरासन्ध इवाऽवलिप्तः ।
नासीरसीनोल्लिखितोऽप्यभीते-र्मरुस्थलेशः स विसंस्थुलोऽभूत् ॥११५॥
आचन्द्रसूर्यस्पृहणीयतेजाः सर्वत्र सम्प्राप्तजयोऽपि किञ्चित् ।
न लोकबाधाय बभूव नीति-रहो महोत्साहकरी न कस्य ॥११६॥
प्रजाव्रजानीतिसुभिक्षभावाद् यद्भाग्ययोगोऽनुमितो गरीयान् ।
स शास्ति शास्ता ह्यवरंगसाहिः पुरीमिमामिन्द्रपुरीमिवेन्द्रः ॥११७॥
प्रबर्हबर्हानपुरादथाऽस्मात्, गुरोर्निदेशं समवाप्य शिष्यः ।
प्राप्तो विशेषाद्विनयावनम्रः, करोति विज्ञप्तिमिमां स मेघः ॥११८॥

## अथ समाचाराः ॥

अनाद्यविद्येव तिमिश्रवल्ली, रूढातिगाढेऽम्बरकक्षकक्षे ।
तारावतारप्रसवैरुपेता कन्या रजन्या परिवर्तिताऽत्र ॥११९॥
जाते प्रभातेऽथ सहस्ररश्मिः पूर्वाचलोत्तुङ्गशिलाचले द्राक् ।
उत्तेजयंस्तीक्ष्णमयूखखड्गान् जहार दावानलवत्तदैनाम् ॥१२०॥
नभःसरस्याः सलिले ललन्त्य-स्ताराबलाकावलयः समन्तात् ।
दैवात् प्रविष्टे रविहस्तिमल्ले उड्डीय ताः क्वापि गता अलक्षाः ॥१२१॥
घने वनेऽस्मिन् गगने समज्या, नक्षत्रनाथस्य निशाचरस्य ।
शूरागमादेव जवेन नंष्ट्वा, क्वाप्यस्तशैलान्तरिता बभूव ॥१२२॥
निःशूरभावेऽपि तमोनिवृत्तिः कृता कथञ्चिद् द्विजनायकेन ।
स(सा?)केवलादेव कलङ्कसङ्गाद् वैवर्ण्यमापद्दिवसाननेऽस्मिन् ॥१२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लब्धे सुराज्ये द्विजनायकेन मतानि नानाव्रतिनां ग्रहौघाः ।
स्याद्वादरूपेऽभ्युदिते सहस्र-भानौ तदेतत् सकलं विलीनम् ॥१२४॥
संमुह्य चन्द्रो दिनवृत्तिमस्याः, श्रियं प्रियायै प्रददौ रजन्यै ।
इतीव वैराद् ग्रहमौक्तिकानि लात्वा दिनेशो रजनीं व्यनैषीत् ॥१२५॥
शैलाधिपत्यं किल हेलिमौलिः पूर्वाचलस्य प्रथयांचकार ।
चन्द्रानने तेन विवर्णताऽभूत्, किमस्तशैलाधिपतेः प्रभाते ॥१२६॥
कुमुद्वतीनां कमला नलिन्यै बलात् समादाय खगेन दत्ता ।
रोलम्बमाला किमितीव राज्ञे वक्तुं गता तेन विवर्णताऽसौ ॥१२७॥
राजाग्रजो मेऽस्तगिरेर्गृहासु मृगाजिनी पाण्डुमहोविभूतिः ।
शमीव शेतेऽर्क इतीव मत्वा पूर्वाद्रिसिंहासनमध्यतिष्ठत् ॥१२८॥
जनैश्च तस्मिन् समये सलील-श्लीलैः सभायामवभासितायाम् ।
**प्रज्ञापना**ज्ञाननिदानसूत्रं स्वाधीयते **कालकसूरि**सृष्टम् ॥१२९॥
पीवार्थ**जीवाभिगमस्म**(माग?)मस्य, व्याख्यानमाख्यानकभावमिश्रम् ।
सभ्येभ्यचेतोहरणाय नित्यं प्रणीयते ध्वस्तसमस्तमिश्रम् ॥१३०॥
ततः पुनः **पाणिनिभाष्य-हेमचन्द्रा-ऽनुभूति**प्रतिपादितानि ।
सवार्त्तिकं(क)व्याकरणान्यमूनि शिष्याः पठन्त्यत्र मनीषिमुख्याः ॥१३१॥
साहित्यशास्त्राण्यपि शैव-जैन-सम्पादितान्यत्र यथाप्रयोगम् ।
नयांश्च केचित् परिचिन्तयन्ति, स्वीयान् विशेषात्तदिवाऽन्यदीयान् ॥१३२॥
योगोपधानोद्वहनादिकृत्यै-र्लोकम्पृणैर्दानतपोगुणैश्च ।
भावैर्विशुद्धैः समयं नयन्ति विमुक्तशोका इह सङ्घलोकाः ॥१३३॥
स्याद्वादिनां भव्यधनव्ययेन स्नात्राणि गात्राणि पवित्रयन्ति ।
वर्याः सपर्या विधिकर्मचर्याः, शिवाय भव्याः प्रणयन्ति नव्याः ॥१३४॥
अष्टाहिकापर्वणि निर्जराणां, नन्दीश्वरद्वीपवरे यथैव ।
स्यादुत्सवस्तद्वदिहापि नित्यं श्राद्धव्रतानां वरिवर्ति मोदः ॥१३५॥
कमोदयी वार्षिकपर्वराजो विश्वाधिपत्ये सहसाऽभिषिक्तः ।
चतुर्थ-षष्ठा-ऽष्टमकैस्तपोभि-र्योधैः सुबोधैरिव सम्परीतः ॥१३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्छासनोड्डामरडिण्डिमस्यो-द्घोषेण दोषेण विवर्जितेन ।
जातोऽत्र जन्तुव्रजजातिबाधा-विधानदुर्ध्यानविधेर्निषेधः ॥१३७॥
नेत्रद्वयेनेव मुखं मृगाक्ष्याः पाञ्चालराजेव मुखद्वयेन ।
राजद्वयेनेव गिरिः सुराणां, तथा स कल्पद्वितयेन रेजे ॥१३८॥
सहस्रपादो दिवसश्रियश्च ज्योत्स्नाभरस्येव च पूर्णिमिन्दोः ।
अष्टाहिकायाः खलु पर्वराजः(ज)-साधारणो भूषणभूष्यभावः ॥१३९॥
अष्टाभिरुद्यन्महिषीभिरिन्द्रो वृषध्वजो मूर्तिभिरष्टभिर्वा ।
यथाऽष्टभिः सिद्धिभिरङ्ग ! योगी, तथैष रेजेऽष्टदिनेन्दिराभिः ॥१४०॥
यथा गिरीशः सरिता सुराणां स्वर्णाचलश्चूलिकया यथैव ।
बभौ तथा वार्षिकपर्वराजः **सांवत्सरिक्या** किल **सच्चतुर्थ्या** ॥१४१॥
कल्पैरनल्पैः कलितो मुनीनां कल्पः स्फुरन् **पर्युषणा**भिधानः ।
राज्ञः पुरोधा इव निर्विरोधः पुरस्कृतस्तत्र जनस्य शान्त्यै ॥१४२॥
सांवत्सरिक्यां गजवाजिपूर्वं चैत्र(त्य?)प्रपाटीकपटेन मन्ये ।
स पर्वराजोऽखिलदिग्जयाय समं प्रतस्थे ध्वजिनीप्र(व्र)जेन ॥१४३॥
गच्छत्समागच्छदतुच्छरूपाः(पो)ऽन्यगच्छसङ्घो ननु तावदेव ।
चतुःपथान्तर्लभतेऽवकाश-मुपस्थितो यावदयं न सङ्घः ॥१४४॥
अनेकवादित्रविचित्रनृत्यैः प्रस्तूयमानो गुरुसङ्घचक्री ।
चैत्यप्रपाटीकरणाय जज्ञे शूरो हि सा- [साक्षात्?]किमु गाङ्गपूरः ॥१४५॥
चतुष्पथेति प्रथिते तदानीं संकी -इति (संकीर्णता?) पौषधिकैस्तथाऽभूत् ।
आस्थानयोगो(गा)द्गगने लि(ऽनि?)लोऽपि, कुर्वन्निवालक्ष्यत पर्वतुल्याम् (?) ॥१४६॥

परस्परक्षान्तिरथ्या(पा)यशान्ति-स्तथा प्रतिक्रान्तिरपि त्रयीयम् ।
शक्तित्रयीवाऽऽब्दिकपर्वराजः समर्थमर्थं रचयांचकार ॥१४७॥
ततो जनामोदकमोदकौघैः साधर्मिकाणां भवति स्म भक्तिः ।
शिवाध्वगानां भवतादमीषां पाथेयमादेयतयेति मत्वा ॥१४८॥
प्रातर्लसत्पारणकं दिदेश सांवत्सरिक्या **धनजीः** स्वगेहे ।
वैदेशिकानां नृपमान्य**कल्लू**-श्राद्धाग्रणीः कारयति स्म भक्तिम् ॥१४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धनस्तु मुख्यो निजमुख्यतायाः शृङ्गाररूपां कुरुते स्म भक्तिम् ।
दानेऽद्वितीयः सुखा[तोऽ?]द्वितीयो युक्तं यदम्बा ह्यमरी प्रसन्ना ॥१५०॥
जलेबिकीः शर्करया घृतेन सिद्धाः प्रसिद्धाः प्रथमं प्रदत्ताः ।
क्षुधापिशाचीहननाय यन्त्र-ह्रींकाररेखा इव वृत्तरूपाः ॥१५१॥
(क्षुधापिशाचीहननाय मन्ये चक्राण्यमूनीव जनैर्वृतानि ॥ पाठान्तरम् ॥)
प्राज्याज्यसामोदकमोदकानां श्रेणिर्जनानां मदतं(नं) ततान ।
श्रीधर्मकल्पद्रुमजा फलानां पंक्तिस्थपुण्यैरिव ढौकितासौ ॥१५२॥
स्वाद्यानि वाद्यानि न भोज्यलक्ष्म्याः हरन्ति चेतांसि न सज्जनानाम् ।
क्षुधाहवेनेव शरैः सरन्ध्रा-ण्यस्या— रेतृणिभटा इवाऽत्र (?) ॥१५३॥
(खाद्यानि वाद्यानि ततानि पूर्वं सिद्धानि लक्ष्म्याः सुखभक्षिकायाः ।
छिद्रालिदम्भादिव दायकानां यशःप्रशस्त्यक्षरसंयुतानि ॥ पाठान्तरम् ॥)
यशोभिरेवाऽङ्घधरैः पयोभिः संयुज्य भूयः पृथुकान् सखण्डान् ।
सन्तर्पयामासुरनेकजन्तून् श्राद्धा जिनेन्दोर्मतमुन्नयन्त्यः ॥१५४॥
प्रसीदनं सप्रहितं हितार्थं परीप्सितं व्यञ्जनराजियुक्तम् ।
भौमाग्निमुक्तं ह्युदरानलस्य मित्रस्य तुष्ट्यै किमुपायनं द्राक् ॥१५५॥
भोज्यानि सर्वाण्यपि बाष्पदम्भात् स्वयं विविक्षूनि मुखे जनानाम् ।
रोषादिवोष्णानि जवात् क्षुधाया जिघांसया मोदमहोदयानि ॥१५६॥
इत्यादिकृत्यानि गुरोर्गरीयः-प्रसादतो विघ्नविवर्जितानि ।
जातानि तद्व(त्त)त्समयोचितानि तान्याद्रियन्ते प्रभुताद्भुतानि ॥१५७॥

## अथ श्रीगुरुवर्णनम् ॥

माहाद्गुरोः सेवनया नयानां निधानभूम्या मनुजस्य यस्य ।
स्यात् संस्तवः संस्तवनीयनामा भवेद् गुणै रत्नगणैर्धनाढ्यः ॥१५८॥
रेवाऽस्ति सेवा गुरुपुङ्गवाना-मानन्दहेतुः कविकुञ्जराणाम् ।
प्रवृत्तिहेतुः क(क्र)चनाऽरिजन्यः पराभवो यत्र भवेदमीषाम् ॥१५९॥
यस्यां रसान्तर्बहु मज्जनेन संचित्य रोचिस्तनु सज्जनेन ।
औत्रत्यलाभात् कलभोऽपि यूथा-धिनाथलक्ष्मीमुररीकरोति ॥१६०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मदात् करेण क्षिपते वराङ्गे रेजो(जे?)गजस्तद्विगतप्रभोऽपि ।
अस्यां निमग्नः शुचिभूतकायो मेघः(घ)श्रियं संचिनुते नवीनाम् ॥१६१॥
मातङ्गरूपेऽपि यदीदृशी स्या-देतत्प्रसङ्गात् सुभगत्ववृत्तिः ।
तद्राजहंसे जलदुग्धसग्धौ विवेकिता किञ्चन नात्र चित्रम् ॥१६२॥
निम्नं विधाय स्वशिरो गजोऽस्यां ललन् निजं पङ्कमपाचकार ।
उच्चैस्ततो गोत्रमनेकसाला-न्वितं भजत्येष विशेषशोभः ॥१६३॥
अस्यास्तु दूरे निवसन् कवीन्द्र-द्विपाधिपः सत्त्रिपदीविभूतिः ।
भद्रोत्तमोऽप्याश्रयते विभूषां न तादृशीं तत्स्मरणात् कृशाङ्गः ॥१६४॥
त्वत्सेवया नर्मदया दयालो ! बालोऽपि किञ्चिद्ज्ञतरोऽहमुच्चैः ।
संपावितस्तद्रसभावनेन गतोऽभितापोऽपि कलिप्रसूतः ॥१६५॥
सेवारसे वासनया यदीयं मनो विलिप्तं सुधयेव देव ! ।
ते स्युर्नरा निर्जररूपभाज आजन्मतः सर्वसुपर्वसेव्याः ॥१६६॥
मरुत्तस(सा?)र्थेन गुरुर्गरीयान् निषेवितः **श्रीविजयप्रभाह्वः** ।
मनीषितास्तस्य समृद्धयः स्यु- र्नित्योदयिन्यो नहि तत्र चित्रम् ॥१६७॥
सेवासुखास्वादनतुन्दिला ये तेषां परेषां न सुखोदयानाम् ।
लिप्सा भवेत् क्वापि सुधासु धारा-स्वादेन किञ्चित् स्वदते तदन्यत् ॥१६८॥
कश्चिद्वणिक्कर्मस(सु)नमसाध्य(?) शौर्यं पुनः कश्चिदुपाद्रियेत ।
कश्चित् कृषिस्तद्वयमेव सेवा-महो महसव(महस्सर्व?) सदर्थसिद्ध्यै ॥१६९॥
श्रीमद्गुरूणामिह सेवनेन स्याद् गौरवेणाऽन्वित एव मर्त्यः ।
कर्पूरगन्धप्रतिबन्धसन्धि स्यात् कीलकं वासतया सुगन्धि ॥१७०॥
हितामृतेनेव निसृष्टवृष्टि-र्दृष्टिर्गुरूणां मयकानुभूत् स (काऽनुभूता?) ।
तस्यां रसः सर्वसुखातिशायी नाद्याप्यसौ विस्मृतिमेति चित्ते ॥१७१॥
श्रीखण्डकर्पूरहिमेन्दुभावान् संयोज्य मन्ये घटितो[ऽस्ति?] सौम्यः ।
कृपाकटाक्षेषु ततस्त्वदीये-ष्वहो सुधापूर इवोज्जजृम्भे ॥१७२॥
दुर्वादिवृन्दा अपि ते निरीक्ष्य, श्रद्धाचरित्रादिगुणौघमुक्ताः ।
त्वद्वर्णनाकैतवतः स्वकण्ठे कृष्ट्वैव सम्यक्त्वमिहाऽर्जयन्ति ॥१७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयन्ति ते गौरववाग्विलासा माधुर्यतः स्पृष्टसुधातिहासाः ।
निशम्य सम्यग् भववह्नितप्ता-स्तान् वस्तुतः शीतलतामयन्ते ॥१७४॥
मनोरथैर्यो विषमोऽपि पन्थाः समादृतः कस्यचिदुत्तमस्य ।
सोऽयं भवान्येव निषेवया ते प्रसाध्यते बाध्यतरोग्रशक्त्या ॥१७५॥
**श्रीदेवसूरिः कुमुदेन्दुजेता** प्राच्यः परस्त्वद्गुरुरर्कजेता ।
**श्रीदेवसूरिश्च** ततोऽधिकश्री-र्गाम्भीर्यतो निर्जितसर्वसिन्धुः ॥१७६॥
जातौ च तौ द्वावपि देवरूपौ मुनीशितस्त्वं तु ततोऽधिकोऽसि ।
वीराभिधानेन समग्रदेवा-तिशायिवीर्योद्भवसूचनेन ॥१७७॥
कालानुभावेन तु यत्तु कश्चि-न्नाथ ! त्वदाज्ञामवमन्यतेऽपि ।
व्यामोहहेतुः सुधियां न तत्किं वीरस्य नाज्ञाविमुखो जमालिः ॥१७८॥
मन्यामहे तन्मनुजानिहिश(?) धन्यांस्तवासेवनतत्परा ये ।
तदन्तराये सहसम्पराये येषां रतिस्ते पशवो नृपाशाः ॥१७९॥
प्रसन्नता क्वापि मुखे मुनीन्दो ! राकाशशाङ्कादतिरेकिणी या ।
दृष्टापि दृष्ट्योर्मुदमातनोति तनूभृतां श्रीगुरुभक्तिभाजाम् ॥१८०॥
तवैव सेवाविधये विधात्रा विनिर्मिताश्चन्दनदीपनाद्याः ।
भावाः स्वभावादपि पूज्यपाद-पूजाविधानैः सफलीक्रियन्ते ॥१८१॥
प्रभोर्यशोभिर्भुवनैरशोभि सर्वैः सुपर्वेशगजानुरूपैः ।
विधुर्वियुक्ताङ्घ्रिविशोषदोषैः श्यामोऽपि किञ्चिद्धवलस्तदाऽभूत् ॥१८२॥
वियोगिनीभिर्विधुरेष शप्त-स्तदस्य वक्षः स्फुटितं प्रतीमः ।
नो चेत् कथं श्रीगुरुवक्त्रपद्म-स्पर्द्धां विधत्ते शकलीकृतोऽपि ॥१८३॥
सेवा त्वदीया मलयानिलस्य परिस्फुरन्ती लहरीव लोके ।
दारिद्र्यसन्तप्तवपुष्मतीं द्राक् प्रमोदमुत्सादयति स्म लक्ष्म्या ॥१८४॥
पूर्वाणि पात्राणि लतेव सेवा प्रचित्य रोचिर्निचयाल्लसन्ती ।
फलैः पुनर्योजयति स्म नव्य-पात्राण्यहो भाग्यविजृम्भितानि ॥१८५॥
सेवाख्यरेवास्वरसाभिसारा-त्तटस्थशिष्यावनिजन्मवृन्दम् ।
उद्भावयन्ती फलसम्पदाढ्य-मापल्लवं संहरतेऽद्भुतं तत् ॥१८६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेवा सुराणां सरिदित्यवैमि यतोऽत्र नित्यं विबुधा रमन्ते ।
विशुद्धभावैः श्रमणानुगामि-वृन्दानुभूता कमलोद्भवाय ॥१८७॥
सेवारेवापुलिनललनैर्भद्रभावानुभावात् ।
येषां चेतो हसति लसति श्रीमुनीन्द्रेऽ[स्त]रागे ।
विश्वे विश्वेऽनुभवविभवं ते जना एजनाभि-
र्मुक्तं व्यक्तं दधति नितरामन्तरेणाऽन्तरायम् ॥१८८॥
परीष्टिरङ्गीष्टविधीविधान-कल्पद्रुकल्पा किल यद्गुरूणाम् ।
तैः सूरिचन्द्रैर्गतसर्वतन्द्रै-र्ज्ञेयः प्रणामः स्वशिशोस्त्रिसायम् ॥१८९॥

**इति श्रीसेवालेखकाव्य सम्पूर्णम् ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org